© 2017 IJSRSET | Volume 3 | Issue 5 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099
International Journal of Scientific Research in Science, Engineering and Technology

# प्राचीनभारते दण्डव्यवस्था



**डा.सुधांशुशेखरमहापात्रः**

सहाचार्यः, धर्मशास्त्रविभागस्य,

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य।

**सारांश :-** साम्प्रतिककाले भारतवर्षे गणतन्त्रशासनं प्रचलति न तु राजतन्त्रम्। अत: सर्वकारीयव्यवस्थायां पूर्वापेक्षया भिन्नताऽवश्यम्भावि। प्राचीनकाले दण्डव्यवस्था किदृशि आसीदिति विषये मया अत्र शोधलेखोऽयं प्रस्तुतः।

विश्वस्मिन् विश्वे भारतवर्ष सर्वेषामादर्शभूतमासीत्। भारतवर्षे यन्नासीत् तदन्यत्रापि नासीत्। अतः भातीयव्यवस्था सवैरेव समादृताऽऽसीत्। प्राचीनभारते राजतन्त्रमासीत्। राजा स्वराज्ये प्रजाः पुत्रवत् पालयति स्म, यतो हि प्रजारक्षणं राज्ञः परमो धर्मः। प्रजापालनार्थ राज्ये दुष्टानां निग्रहः कर्त्तव्य एव, अन्यथा शिष्टानां परिपालनं सुष्ठुतया कर्तुं न शक्येत। अतस्तदर्थं दुष्टानां परिज्ञानमपेक्ष्यते। दुष्टपरिज्ञानञ्च व्यवहारमन्तरेण न सम्भवति। ततो व्यवहारेण राजा दुष्टान् जानीयात्, ज्ञात्वा तांश्च दण्डयेत्। तत्र के दुष्टा इति जिज्ञासायां [1]याज्ञवल्क्येन प्रतिपादितं यत्-

**देशाद्देशान्तरं याति सृक्किणी परिलेढि च।**
**ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च।।**
**परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते।**
**वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि।।**
**स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः।**
**अभियोगेऽथ साक्षे वा दुष्टः स परिकीर्तितः।।इति।।**

एवं प्रकारेण राजा निश्चितरूपेण दुष्टान् ज्ञात्वा तान् दण्डयेत्। वस्तुत: दण्डं विना दुष्टाः कथमपि दमयितुं न शक्यन्ते। अत: सर्वेषां भूतानां रक्षार्थं भगवता ब्रह्मणा धर्मपुत्ररूपेण दण्ड एव सृष्टः। प्रसङ्गेऽस्मिन् [२]मनुनोक्तं यत् -

**तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम्।**

**ब्रह्मतेजोमयं दण्डमसृजत् पूर्वमीश्वरः।। इति।।**

राजा तमेव दण्डं देशकालानुसारेण शक्तिं चापेक्ष्यऽपराधिषु प्रणयेत्। यथोक्तं [३]मनुना-

**तं देशकालौ शक्तिञ्च विद्यां चावेक्ष्य तत्त्वतः।**

**यथार्हतः संप्रणयेन्नरेष्वन्यायवर्तिषु।।इति।।**

स एव दण्डः सर्वाः प्रजाः शास्ति, सर्वान् रक्षति, सुप्तासु प्रजासु स एव जागर्ति, तस्माद् दण्ड एव धर्म इत्युच्यते। प्रसङ्गेऽस्मिन्नुक्तं [४]मनुना-

**दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति।**

**दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः।।**

यदि राजा सम्यग् विचार्य दण्डं पातयेत्, तर्हि स प्रजा रञ्जको भवेत्; अन्यथा सर्वमपि विनश्येत्। मत्स्यन्यायेन सबला दुर्बलान् पीडयेयुः। दण्डं विना काकोऽपि पुरोडाशं भक्षयितुं प्रभवेत् , अधस्तनानां स्थानमुपरि, उपरिस्थितानां स्थानमप्यध: स्यात्। समाजेऽस्मिन् शिष्टा नरा दुर्लभाः। अत: केवलं दण्डस्य हि भयात्सर्वं जगदिदं भोगाय कल्पते। प्रसङ्गेऽस्मिन् [५]मनुना प्रतिपादितं यत्-

**समीक्ष्य स धृतः सम्यक् सर्वाः रञ्जयति प्रजाः।**

**असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः।**

**यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः।**

**शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः।।**

**अद्यात्काकः पुरोडाशं श्वा च लिह्याद्धविस्तथा।**

**स्वाम्यञ्च न स्यात् कस्मिंश्चित् प्रवर्तेताधरोत्तरम्।।**

**सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः।**

**दण्डस्य हि भयात्सर्वं जगद्भोगाय कल्पते।।इति।।**

अत एव दण्डाद् भीता दुष्टाः शिष्टानां क्षतिं साधयितुं न पारयन्ति। तस्मात् प्राचीनकाले राजा दण्डेनैव सर्वान् दुष्टान् दमयित्वा शिष्टान् पालयति स्म। अतो दण्डस्य प्रशंसा श्रूयते।

प्राचीनभारते दण्डो मुख्यतो द्विविध आसीत्। बाह्यदण्ड आभ्यन्तरदण्डश्चेति। आभ्यन्तरदण्डः प्रायश्चित्तमिति कथ्यते। बाह्यदण्डः पञ्चप्रकारको दृश्यते स्म। तद्यथा- वाग्दण्ड:(वचसा भर्त्सनम्), धिग्दण्ड:(धिक्कारः), धनदण्डः, देशानिर्वासनं ,वधदण्डश्चेति। एतेषु वाग्दण्डस्य प्राथम्यं ततः क्रमेण धिग्दण्डादिकं देयमिति [६]मनुना प्रतिपादितम्। यथोक्तं तेन-

**वाग्दण्डं प्रथमं कुर्याद् धिग्दण्डं तदनन्तरम् ।**

**तृतीयं धनदण्डन्तु वधदण्डमतः परम् ।। इति।।**

तत्र धनदण्डः सर्वस्वापहरणरूपः अथवा स्थलविशेषे प्रथमसाहस-मध्यमसाहसोत्तमसाहसात्मकः। प्रथमसाहसः सार्द्धद्विशतपणात्मकः, मध्यमसाहसः पञ्चशतपणात्मकः,उत्तमसाहसश्च सहस्रपणात्मकः इति मनुना प्रतिपादितम्। परवर्त्तिनि काले तस्यैव दण्डस्य परिमाणो याज्ञवलक्यमतेन परिवर्द्धितो भूत्वा क्रमेण साशीतिसहस्रपणात्मकः, चत्वारिंशदधिकपञ्चशतपणात्मकः, सप्तत्यधिकद्विशतपणात्मकश्च सञ्जातः। अत्र पणशब्देन कार्षापणः अर्थात् ताम्रिकपणो बोध्यते। वधदण्डश्च त्रिविधः। पीडनम्, अङ्गच्छेदः मृत्युदण्डश्च। पीडनशब्देन वंशदण्ड-वेत्र-प्रतोदादिना वा आघातः, कारागारावरोधः, निर्दिष्टस्थाने निगडादिना बन्धनम्, शिरसो मुण्डनं, गर्दभोपरि उपवेश्य भ्रामणम्। अङ्गच्छेदशब्देन अङ्गुलिहस्तपदादिकतनादिकं बोध्यते। मृत्युदण्डोऽप्यनेकप्रकारकः। तद्यथा-शूलोपरि उपवेशनं, शिरच्छेदनं, श्वादिभिश्च भक्षणादिकम्। दण्डस्य दशस्थानानि [७]मनुना प्रतिपादितानि यानि कृतापराधस्य कर्त्तनीयानि। तानि यथा- दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत्।

**उपस्थमुदरं जिह्वा हस्तौ पादौ च सर्वेषाम्।**

**चक्षुर्नासा च की च धनं देहस्तथैव च।।इति।।**

पुनश्च वर्णभेदेनापि दण्डव्यवस्था पृथक् पृथगासीत्। शूद्रस्य यस्मिन्नपराधे यावान् दण्ड: वैश्य-क्षत्रियब्राह्मणानां क्रमेण तस्मिन्नेवापराधे ततो द्विगुणो द्विगुणो दण्डो देय इति प्राचीनकाले व्यवस्थाऽऽसीत्। प्रसङ्गेऽस्मिन् [८]चण्डेश्वरेण कात्यायनवचनमुत्थाप्य विवादरत्नाकरे प्रतिपादितं यत्-

**येन दोषेण शूद्रस्य दण्डो भवति धर्मतः।**

**तेन विदक्षत्रविप्राणां द्विगुणो द्विगुणो भवेत्।।इति।।**

[९]मनुनापि प्रसङ्गेऽस्मिन्नुक्तं यत्-

**अष्टापाद्यन्तु शूद्रस्य स्तेये भवति किल्विषम्।**

**षोडशैव तु वैश्यस्य द्वात्रिंशत् क्षत्रियस्य च।**

**ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत्।**

**द्विगुणा वा चतुःषष्टिस्तद्दोषगुणविद्धि सः।।इति।।**

कृतापराधस्य ब्राह्मणस्य तदानीं शारीरदण्डो नासीत्। तस्य केवलं रज्वादिना बन्धनं कृत्वा कर्म कार्यते स्म। प्रसङ्गेऽस्मिन् वर्द्धमानेन हलायुधवचनमुत्थाप्य [१०]दण्डविवेके प्रतिपादितं यत्-

**न शारीरो ब्राह्मणस्य दण्डो भवति कर्हिचित्।**

**गुप्ते तु बन्धनं कृत्वा राजा भक्तं प्रदापयेत्।।**

**अथवा बन्धनं रज्वा कर्म वा कारयेन्नृपः।।इति।।**

[११]मनुना तु कृतमहापराधस्यापि ब्राह्मणस्य हननं न कृत्वा राष्ट्राद् बहिष्करणं प्रतिपादितम्। तद्यथा-

**न जातु ब्राह्मणं हन्यात् सर्वपापेष्ववस्थितम्।**

**राष्ट्रादेनं बहिष्कुर्यात् समग्रधनमक्षतम्।। इति।।**

यदि राजा कृतापराधं न दण्डयेत् निरपराधं वा प्रमादाद्दण्डयेत्, तर्हि स नरकगामी भवतीति [१२]मनुना प्रतिपादितम्। यथोक्तं तेन -

**अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाऽप्यदण्डयन्।**

**अयशो महदाप्नोति नरकं चैव गच्छति ।। इति।।**

पुनश्च सत्यप्यपराधे पितृमातृगुर्वाचार्यब्राह्मणगवादीनां वधो न कार्य इति सामान्येन प्रतिपाद्यापि तेषु कमप्याततायिरूपेणायान्तं विना विचारं हन्यादिति [१३]मनुना स्पष्टतया पृथक् पृथक् स्थले प्रदर्शितम्। तद्यथा-

**आचार्यञ्च प्रवक्तारं पितरं मातरं गुरुम्।**
**न हिंस्याद् ब्राह्मणान् गांश्च सर्वांश्चैव तपस्विनः।।इति।।**
**परन्तु गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्।**
**आततायिनमायान्तं हन्यादेवाऽविचारयन्।। इति।।**

अतो राजा स्थानकालपात्रादिकं सर्वं सम्यग् विचार्य दण्डं दद्यात् , अन्यथा महान् अनर्थो भवेत्। प्राचीनकाले चौरस्यापि मृत्युदण्ड आसीत्। यः कुड्ये छिद्रं कृत्वा चोरयति राजा तं शूले निवेशयति स्म। ये च ग्रामे चौरस्य सहायका भवन्ति तानपि सर्वान् राजा घातयेदिति कठोरनियम आसीत्। यथोक्तं [१४]मनुना-

**सन्धिं छित्वा तु ये चौर्य रात्रौ कुर्वन्ति तस्कराः।।**

**तेषां छित्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेत्।।इति।।**

**ग्रामेष्वपि च ये केचिच्चौराणां भक्तदायकाः।**

**भाण्डावकाशदाश्चैव सर्वांस्तानपि घातयेत्।।इति।।**

चौरस्य दण्डविषये [१५]याज्ञवल्क्येनोक्तं यत्-

**चौरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैः।**

**सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद् विप्रवासयेत्।।इति।।**

यश्चौर: गृहे प्रविश्य वस्त्रादिकमुक्षिप्य अपहरति अथवा ग्रन्थिवद्धं वस्त्रादिकमुन्मोच्य चोरयति तस्य संदंशभूतं तर्जन्यङ्गष्ठाङ्गलिद्वयं कर्तयेत्। तस्य तादृशे द्वितीयापराधे तस्य हस्तं पादञ्च कर्त्तयेदिति प्राचीने काले कठोरदण्डव्यवस्थाऽऽसीत् येन चौराणां चौर्यकरणे भयमासीत्। प्रसङ्गेऽस्मिन् [१६]याज्ञवल्क्येन प्रतिपादितं यत्-

**उत्क्षेपकसन्धिभेदौ करसंदंशहीनको।**

**कार्यों द्वितीयापराधे करपादैकहीनको।।इति।।**

एवं प्रकारेण प्राचीनदण्डव्यवस्था अतीव कठोराऽऽसीत्। पुनश्च परदारगमने महान् उद्वेजनकरो दण्डो देय ओसीत्। यथोक्तं [१७]मनुना-

**परदाराभिमर्शेषु प्रवृत्तान् नृन् महीपतिः।**

**उद्वेजनकरैर्दण्डै: छिन्नयित्वा प्रवासयेत्।।इति।।**

अपि च कामपि कन्यां तदनिच्छासत्त्वे बलात् धर्षणं कुर्वतः वधदण्डस्य व्यवस्थाऽऽसीत्। किन्तु यदि कन्या स्वेच्छया प्रवर्त्तते तर्हि न वधदण्डः। यथोक्तं [१८] मनुना-

**योऽकामां दूषयेत् कन्यां स सद्यो वधमर्हति।**

**सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः।।इति।।**

नानाव्यवस्थासु दण्डव्यवस्थायामपि भिन्नता बहुक्षेत्रेषु परिलक्ष्यते। विशेषतः सम्प्रति यद्यपि दण्डव्यवस्थायां मृत्युदण्डः (रज्जुनोद्बन्धनम् 'फासी'इति)विद्यते तथापि स कादाचित्कः। परिस्थितिविशेषे राष्ट्रपतिस्तस्य क्षमामपि कर्तुं शक्नुयात्। तदतिरिच्य आजीवनकारावासः, आकालिक-कारावासः, समग्रसम्पत्तिहरणम्, अर्थदण्डादयो वर्तन्ते। कारावासोऽपि साधारणकारावासः, लौहनिगडेन बन्धनेन सह कारावासः, सश्रमकारावासश्चेति बहुधा दृश्यते। यद्भवतु साम्प्रतिककाले पूर्वापेक्षया दण्डस्य लघुता दृश्यते। यतो हि सम्प्रति विचारकाणां मतं यत् कश्चिद् अपराधी प्रमाणाभावात् दण्डात् मुक्तो भवतु नाम, किन्तु कश्चिन्निरपराध: कदापि दण्डनीयो न भवतु इति। एवं प्रकारेण मया संक्षेपेण प्राचीनभारते दण्डव्यवस्थविषये प्रतिपाद्य विरम्यते।

## पादटिप्पणी

१.याज्ञ.१३-१५

२.मनु.७-१४

३.मनु.७-१६

४.मनु.७-१८

५.मनु.७/१९-२२

६.मनु.८-१२९

७.मनु.९-२३८

८.वि.र.पृ.-.९२४

९.मनु.८-३३७

१०.द.वि.पृ.-६७

११.मनु. ८-३८०

१२.मनु.८-१२८

१३.मनु.४-१६२,.मनु.८-३५०,मनु.

१४.९-२७६ ,मनु. ९-२७१

१५. याज्ञ. व्य. २७०

१६.याज्ञ.व्य.२७४

१७.मनु. ८-३५२

१८.मनु.८-३६४

## सन्दर्भग्रन्थसूची

१.मनुस्मृतिः - चौखम्बा संस्कृत संस्थान, वाराणसी, २००३

२.मिताक्षरा(याज्ञ.टीका) - नागप्रकाशन, दिल्ली, १९८५

३.याज्ञवल्क्यस्मृतिः - नागप्रकाशन, दिल्ली, १९८५

४.विवादरत्नाकरः - कृष्णदास अकादमी, वाराणसी, १९८९